## गोतो णित् । (९०/२८४)

गोशब्दात् परं सर्वनामस्थानं [1]णित् भवति । [2]णित्कार्यं तत्र भवति इत्यर्थः । गौः, गावौ, गावः । तपरकरणं किम् ? चित्रगुः । शबलगुः । कथं हे चित्रगो, हे [3]शबलगव इति? '[4]अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' (व्या. प. ३४) इति सम्बुद्धिजसोर्गुणे कृते णित्त्वं न [5]भवति । अथ वा गोतः इति [6]सम्बन्धलक्षणा षष्ठी, गोतः सम्बन्धि यत् सर्वनामस्थानम् इति । यच्च तदर्थस्यैकत्वादिषु सर्वनामस्थानं तद् गोः सर्वनामस्थानम् इत्युच्यते । चित्रगुशब्दात् तु[7] सर्वनामस्थानं तदन्यपदार्थस्यैकत्वादीनाह । तपरकरणं तु निर्देशार्थमेव । केचित् 'ओतो णित्' इति पठन्ति, द्योशब्दादपि [8]यत् सर्वनामस्थानं विद्यते तदर्थम् । द्यौः, द्यावौ, द्यावः । गोतः [9]इत्येतदेव तपर–करणनिर्देशात् ओकारान्तोपलक्षणं द्रष्टव्यम् । वर्णनिर्देशेषु हि तपरकरणं प्रसिद्धम् ॥

## णलुत्तमो वा । (९१/२२८३)

उत्तमो णल् वा णित् भवति । णित्कार्यं तत्र वा भवति इत्यर्थः । [10]अहं चकर, अहं चकार । [11]अहं पपच, अहं पपाच[12] ॥

## सख्युरसम्बुद्धौ । (९२/२५३)

असम्बुद्धौ यः सखिशब्दः तस्मात् परं सर्वनामस्थानं [13]णित् भवति । सखायौ । सखायः[14] । असम्बुद्धौ इति किम् ? हे सखे ॥

## अनङ् सौ । (९३/२४८)

सखिशब्दस्य सौ परतः अनङ इत्ययमादेशो भवति, [15]स चेत् सुशब्दः सम्बुद्धिः न भवति । सखा । असम्बुद्धौ [16]इति किम् ? हे सखे ॥

## ऋदुशनस्पुरुदंसोऽनेहसां च । (९४/२७६)

ऋकारान्तानामङ्गानाम् उशनस् पुरुदंसस् अनेहस् इत्येतेषां च असम्बुद्धौ सौ परतः अनङ आदेशो भवति । कर्ता । हर्ता । माता । पिता । भ्राता । उशना । पुरुदंसा । अनेहा । असम्बुद्धौ इत्येव, हे कर्तः । हे मातः । हे पितः । हे पुरुदंसः । हे अनेहः । हे उशनः । उशनसः सम्बुद्धौ अपि पक्षे अनङ इष्यते । हे उशनन् । 'न ङिसम्बुद्धयोः' (८.२.८/३५२) इति नलोपप्रतिषेधोऽपि पक्षे इष्यते । हे उशन । तथा चोक्तम् –

सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यन्दिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः ॥

इति[17] । तपरकरणमसन्देहार्थम् ॥

---

1. णिद्वत् क. इ. 2. णित्कार्याणि भवन्ति ड. इ. 3. चित्रगव ड. 4. अङ्गवृत्तेः क. 5. भविष्यति इ. 6. सम्बन्धलक्षणे क. 7. यत् इत्यधिकम् इ. क. ड. 8. यथा स्यात् ड. 9. इत्यस्मादेव क. 10. बहु जगद पुरस्तात्तस्य मत्ता किलाहम् । चकर च किल चाटु प्रौढयोषिद्वदस्य इत्यधिकम् क. 11. उदाहरणमिदं नास्ति क. 12. उत्तम इति किम् ? देवदत्तः पपाच इत्यधिकम् क. 13. णिद्वद् भवति क. 14. सखायम् सखायौ इत्यधिकम् क. 15. सम्बुद्धिवर्जिते सौ परतः ह. 16. इत्येव क. इ. 17. श्लोकवार्तिके इत्यधिकम् फ.